# Shri Sharadamanidashakam

# श्रीशारदामणिदशकम्

## Document Information

Text title : Shri Sharadamanidashakam

File name : shAradAmaNidashakam.itx

Category : deities_misc, gurudev, rAmakRiShNa, dashaka

Location : doc_deities_misc

Author : Atmapragya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीशारदामणिदशकम्

मानुषीं तनुमाश्रित्य लोकोद्धारविधायिनीम् ।
पतिलीलासहायां च वन्दे तां शारदामणिम् ॥ १॥

नारायणे यथा लक्ष्मीर्यथा गौरी च शङ्करे ।
रामकृष्णे तथा याम्बा वन्दे तां शारदामणिम् ॥ २॥

धरित्रीव सहिष्णुर्या स्पन्दक्षोभादिवर्जिता ।
स्वात्माभासनिरोधा च वन्दे तां शारदामणिम् ॥ ३॥

पतिप्रिया पतिप्राणा पतिसेवातिशोभना ।
पतिध्यानपरा या वै वन्दे तां शारदामणिम् ॥ ४॥

पतिशिक्षा प्रमोदा या ज्ञानभक्ति समुच्चिता ।
सर्वार्थसाधिका देवी वन्दे तां शारदामणिम् ॥ ५॥

अम्बा या भक्तशिष्याणां जगदम्बा समासदा ।
वराभयामृतस्यन्दा वन्दे तां शारदामणिम् ॥ ६॥

स्वान्तःस्था शास्त्रमर्मज्ञा आबाल्यब्रह्मचारिणी ।
पाखण्डोपाधिविध्वंसा वन्दे तां शारदामणिम् ॥ ७॥

सदाशान्ताब्धिसङ्काशा सदा प्रबोधमालिका ।
सदा सत्यविधात्री या वन्दे तां शारदामणिम् ॥ ८॥

दीनार्त्तदुःखहा माता कृपया परया युता ।
अबोधं रक्ष सन्तानं मायाचक्रविभेदतः ॥ ९॥

अद्य ते पुण्यजन्माहः स्मरन् मातृ-सुगौरवम् ।
पादेऽत्र प्रार्थनां देवि ! प्रीत्या सावहिता शृणु ॥ १०॥

इति श्रीआत्मप्रज्ञविरचितं “श्रीश्रीशारदामणिदशकम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Sharadamanidashakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*